# Shri Shasta Stutidashakam

# श्रीशास्तास्तुतिदशकम्

## Document Information

Text title : shAstAstutidashakam

File name : shaastaastutidashakam.itx

Category : deities_misc, ayyappa, stotra, dashaka

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 22, 2025

*sanskritdocuments.org*

# श्रीशास्तास्तुतिदशकम्

आशानुरूपफलदं चरणारविन्द-
भाजामपारकरुणार्णवपूर्णचन्द्रम् ।
नाशाय सर्वविपदामपि नौमि नित्य-
मीशानकेशवभवं भुवनैकनाथम् ॥ १॥

पिञ्छावली वलयिताकलितप्रसून-
सञ्जातकान्तिभरभासुरकेशभारम् ।
शिञ्जानमञ्जुमणिभूषणरञ्जिताङ्गं
चन्द्रावतंसहरिनन्दनमाश्रयामि ॥ २॥

आलोलनीलललिताळकहाररम्य-
माकम्रनासमरुणाधरमायताक्षम् ।
आलम्बनं त्रिजगतां प्रमथाधिनाथ-
मानम्रलोकहरिनन्दनमाश्रयामि ॥ ३॥

कर्णावलम्बिमणिकुण्डलभासमान-
गण्डस्थलं समुदिताननपुण्डरीकम् ।
अर्णोजनाभहरयोरिव मूर्तिमन्तं
पुण्यातिरेकमिव भूतपतिं नमामि ॥ ४॥

उद्दण्डचारुभुजदण्डयुगाग्रसंस्थं
कोदण्डबाणमहितान्तमदान्तवीर्यम् ।
उद्यत्प्रभापटलदीप्रमदभ्रसारं
नित्यं प्रभापतिमहं प्रणतो भवामि ॥ ५॥

मालेयपङ्कसमलङ्कृतभासमान-
दोरन्तराळतरळामलहारजालम् ।
नीलातिनिर्मलदुकूलधरं मुकुन्द-
कालान्तकप्रतिनिधिं प्रणतोऽस्मि नित्यम् ॥ ६॥

यत्पादपङ्कजयुगं मुनयोऽप्यजस्रं
भक्त्या भजन्ति भवरोगनिवारणाय ।
पुत्रं पुरान्तकमुरान्तकयोरुदारं
नित्यं नमाम्यहममित्रकुलान्तकं तम् ॥ ७॥

कान्तं कळायकुसुमद्युतिलोभनीय-
कान्तिप्रवाहविलसत्कमनीयरूपम् ।
कान्तातनूजसहितं निखिलामयौघ-
शान्तिप्रदं प्रमथयूथपतिं नमामि ॥ ८॥

भूतेश भूरिकरुणामृतपूरपूर्ण-
वारान्निधे, वरद, भक्तजनैकबन्धो । (वारान्निधे परमभक्त)
पायाद्भवान् प्रणतमेनमपारघोर-
संसारभीतमिह मामखिलामयेभ्यः ॥ ९॥

हे भूतनाथ भगवन्, भवदीयचारु-
पादाम्बुजे भवतु भक्तिरचञ्चला मे ।
नाथाय सर्वजगतां भजतां भवाब्धि-
पोताय नित्यमखिलाङ्गभुवे नमस्ते ॥ १०॥

इति श्री शङ्करभगवद्पाद विरचितं
श्रीशास्तास्तुतिदशकं सम्पूर्णम् ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shri Shasta Stutidashakam*
pdf was typeset on May 22, 2025

Please send corrections to *sanskrit@cheerful.com*